[६१४] अनजादौ विभाषा लोपो वक्तव्यः । (म. भा. २. ४२५)

देवदत्तकः, [1]देवकः । यज्ञदत्तकः, यज्ञकः ।

[६१५] लोपः पूर्वपदस्य च ठाजादावनजादौ च वक्तव्यः । (म.भा. २.४२५)

दत्तिकः, दत्तिलः, दत्तियः, [2]दत्तकः ।

[६१६] विनाऽपि प्रत्ययेन पूर्वोत्तरपदयोः विभाषा लोपो वक्तव्यः ।

देवदत्तो दत्तः, देव इति वा ।

[६१७] [3]उवर्णाल्ल इलस्य च । (म. भा.२. ४२५)

भानुदत्तो भानुलः । [4]वसुदत्तो वसुलः ।

चतुर्थादनजादौ च लोपः पूर्वपदस्य च ।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च (म.भा. २.४२५) ॥

[६१८] द्वितीयादचो लोपे सन्ध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम् ।

[5]लहोडः लहिकः । कहोडः कहिकः ।

[६१९] एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः । (म. भा.२.४२५)

[6]वागाशीः वाचिकः । [7]स्रुचिकः । त्वचिकः । कथं षडङ्गुलिदत्तः षडिकः इति ? षषष्ठाजादिवचनात् सिद्धम् ॥

## शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् । (८४/२०३८)

[8]शेवलादीनां मनुष्यनाम्नां ठाजादौ प्रत्यये परतः तृतीयादचः [9]ऊर्ध्वस्य लोपो भवति । पूर्वस्यायमपवादः । अनुकम्पितः शेवलदत्तः शेवलिकः, शेवलियः, शेवलिलः । सुपरिकः, सुपरियः, सुपरिलः । विशालिकः, विशालियः, विशालिलः । वरुणिकः, वरुणियः, वरुणिलः । अर्यमिकः, अर्यमियः, अर्यमिलः ।

[६२०] [10]शेवलादीनां तृतीयादचो लोपः स चाकृतसन्धीनामिति वक्तव्यम् । (म. भा.२.४२६)

शेवलेन्द्रदत्तः, सुपर्याशीर्दत्तः शेवलिकः, [11]सुपरिकः इति यथा स्यात् । शेवलयिकः, सुपर्यिकः इति मा भूत् ॥

---

1. देवियः ग. 2. दत्तकः नास्ति क. 3. उवर्णान्तात् क. 4. वायुदत्तः वायुलः क. 5. उपलः, नहोलः, नहिलः क. 6. वागाशीर्दत्तः क. 7. स्रुचिकः नास्ति क, शुचियः ब. 8. शेवल सुपरि विशाल वरुण अर्यमन् इत्येवमादीनाम् क. ह. फ. 9. ऊर्ध्वं ह, ऊर्ध्वं यत् शब्दरूपं तस्य फ. 10. वरुणादीनाम् इति भाष्यपाठः क 11. सुपरिलः ड.